National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 40-42
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Valluri Thriambakam**
Lecturer in mo College,
Jillellamudi, (vi), Baptla (dist),
Andhra Pradesh -522113

.

**Correspondence:**
**Dr. Valluri Thriambakam**
Lecturer in mo College,
Jillellamudi, (vi), Baptla (dist),
Andhra Pradesh -522113

# वर्णाश्रमधार्मानां वैशिष्ठ्यम्

**Dr. Valluri Thriambakam**

**मनुस्मतौ वर्णधर्माः -**

पुरुषार्थसिद्धये जीविते कालविभागादाश्रमधर्माः विहिताः । लोकयात्रानिर्वहणार्थं मनुष्याणां मध्ये तेषां कर्तव्यविभागोऽपि भगवतैव निरूपितः । तत्तत् कर्तव्योपदेशकाः एव वर्णाः। अर्थकाममोक्षसाधकाश्च आश्रमाः । वर्णशब्दो वर्ण्यते प्रेरयति पुरुषमित्यर्थे 'वर्ण- प्रेरणे' इति धातोः हलश्च' इति सूत्रेण, यद्वा वर्णयति प्रेरयतीति वर्णः; पुरुषान् स्वस्वकर्मसु नियोजयतीति वर्णधातोः पचाद्यच्' इति सूत्रेण वर्णशब्दस्य कोशेषु बहुषु अर्थेषु दृश्यमानेष्वपि धर्मशास्त्रेषु ब्राह्मणाद्यर्थे वर्णशब्दो रूढः। **वर्णाः स्युः ब्राह्मणादयः**[1] इत्यमरः ।

आश्रमशब्दोऽपि एवमेव अनेकार्थकः। अरण्ये मुनीनां निवासः आश्रयः। ब्रह्मचर्यादि आश्रमबोधकः इत्यादि अनेकार्थकोऽपि धर्मशास्त्रेषु ब्रह्मचर्य-गृहस्थ- वानप्रस्थ-सन्यासरूपान् चतुरः आश्रमान् बोधयति। आश्रमशब्दः 'श्रमु - तपसि' इति धातोः आश्राम्यन्ति अत्र, आश्राम्यन्ति अनेन वा इति विग्रहे हलश्च इति सूत्रेण घञ् प्रत्यये भवति । अत उपधायाः ' इति प्राप्ता वृद्धिस्तु **नोदात्तोपदेशस्य मान्तस्यानाचामे**[2] इति सूत्रेण न भवति ।

वर्णानां प्रस्तावो वेदेष्वेव दृश्यते । आश्रमाणां प्रचारस्तु धर्मशास्त्रेषु विहितः । विराट्पुरुषस्य मुखात् ब्राह्मणाः, बाहुभ्यां क्षत्रियाः, ऊरुभ्यां वैश्याः, पादाभ्यां शूद्राश्च जाताः इति पुरुषसूक्ते वर्णितम् ।

**ब्राह्मणोऽस्य मुखमासीत्**
**बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः**
**पद्भ्यां शूद्रो अजायत ।।**

इति पुरुषसूक्तभागः प्रसिद्ध एव ।

धर्मशास्त्रानुसारेण जातमात्रस्य वर्णः पितृभ्यां संक्रान्तो भवतीति प्रथमं वर्णाः निरूप्यन्ते । वर्णाश्च ब्राह्मण-क्षत्रिय - वैश्य - शूद्राः इति चत्वारः ।

**जन्मना ब्राह्मणो ज्ञेयः**
**संस्कारैः द्विज उच्यते ।**
**विद्यया याति विप्रत्वम्**
**त्रिभिः श्रोत्रिय उच्यते ॥**

अतः जन्मना एव ब्राह्मणादिकुलव्यवहारः भवति। न तावता तस्य पूज्यता सिद्ध्यति । किन्तु यः संस्कारसमन्वितः, आत्मगुणवान् च भवति सः लोके पूज्यः। मनुस्मृतौ ब्राह्मणः इतरेभ्यः पूज्य इति तत्कालधर्मानुरोधेन स्पष्टमुक्तम् ।

**ब्राह्मणस्य श्रेष्ठत्वम् -**

ब्राह्मणस्येतरवर्णत्रयादुत्तमत्वमेकादशभिश्श्लोकैर्मनुर्निरूपितवान् । यद्यपि सर्वः पुरुषः पवित्र एव। किन्तु नाभेः ऊर्ध्वभागः पवित्रतरो भवति। ततः शिरसः विराट् पुरुषादुपन्नत्वात् वेदानां धारणाच्च ब्राह्मणः

पूज्यो भवति । एवं धर्मानुरोधेन ब्राह्मणः सर्ववर्णेषु समर्थो भवति। ब्राह्मणमुखेनैव देवेभ्यो हव्यकव्यदानं भवति । तत्राग्निमुखेन देवेभ्यो देयस्य हविषो हव्यमिति नाम। पितृभ्यो देयस्य हविर्भागस्य कव्यमिति व्यवहारः । एवं हव्यकव्यद्वयमपि ब्राह्मणेनैव दत्तं भवति । इतरेऽपि क्षत्रियादयो ब्राह्मणं याजकं कृत्वा देवेभ्यः पितृभ्यश्च हव्यकव्यादि ददाति। स्थावरजङ्गमादिजीवकोटिमध्ये प्राणिनः श्रेष्ठाः भवन्ति । प्राणिष्वपि बुद्धिजीविनः श्रेष्ठाः । चतुष्पादेषु जन्तुष्वपि तत्र तत्र बुद्धिमत्ता दृश्यते इति बुद्धिमत्सु नराः श्रेष्ठाः भवन्ति । नरेष्वपि ब्राह्मणाः श्रेष्ठाः[3] इति मनुना निरूपितम् । जातिमात्रेणापि ब्राह्मणाः पूज्याः न भवन्ति । किन्तु विद्वांसः एव पूज्याः भवन्ति । विद्वत्स्वपि ये विवेकशालिनस्ते पूज्याः । तेष्वपि यज्ञकर्तारः श्रेष्ठाः। याजकेष्वपि ब्रह्मवादिनश्श्रेष्ठतमाः । एवं ब्राह्मणस्यैव मोक्षेऽपि अधिकारो भवति। सृष्टौ सर्वं धनं यज्ञादिकारणेन प्रीत्या देवैः दत्तमिति ब्राह्मणस्यैव भवति। तस्यैव स्वमन्ये क्षत्रियादयो भुञ्जते। ब्राह्मणकृतकर्माधीनत्वात् जगतः सर्वं जगत् ब्रह्मस्वमिति मनुः स्पष्टमुक्तवान् । ब्राह्मणस्यैव कृपया इतरे जनाः आहारं प्राप्नुवन्तीति मनुस्मृतौ स्पष्टमुक्तम् । स्पष्टप्रतिपत्तये कुल्लूकभट्टव्याख्यासहिताः तत्र उदाहृताः श्लोकाः निरूप्यन्ते । --

**ऊर्ध्वं नाभेर्मध्यतरः**
**पुरुषः परिकीर्तितः ।**
**तस्मान्मेध्यतमं तस्य**
**मुखमुक्तं स्वयंभुवा ॥**
**उत्तमाङ्गोद्भवा ज्यैष्ठाद्**
**ब्रह्मणश्चैव धारणात् ।**
**सर्वस्यैवास्य सर्गस्य**
**धर्मतो ब्राह्मणः प्रभुः ॥**
**द्वितीयं मौञ्जिबन्धने ।**
**तृतीयं यज्ञदीक्षायां**
**द्विजस्य श्रुतिचोदनात्[4] ॥**

**क्षत्रियस्य धर्माः -**

क्षत्रियशब्दः एव सः प्रजारक्षणपरो भवेदिति अर्थं निरूपयति। 'क्षतात् त्रायते ' इति क्षत्र: क्षत्रे भवः क्षत्रियः। क्षत्रात् घः[5] इति क्षत्रशब्दस्य घ प्रत्यये इयादेशे 'क्षत्रिय' इति रूपं भवति। कालिदासेनाऽपि उक्तम् -

**क्षतात् किल त्रायत इत्युदग्रः**
**क्षत्रस्य शब्दो भुवनेषु रूढः ।**
**राज्येन किं तद् विपरीतवृत्तेः**
**प्राणैः उपक्रोशमलीमसैः वा[6] ॥**

अतः स्वप्राणानपि अविगणय्य प्रजापालनं रक्षणं च कार्यमिति क्षत्रियधर्मः प्रसिद्ध एव । एवं क्वचिदकार्यं कृत्वापि क्षत्रियः प्रजारक्षणं कुर्यादित्यपि महर्षिभिः क्षत्रियधर्मो निरूपितः।

**नृशंसमनृशंसं वा**
**प्रजारक्षणकारणात् ।**
**पातकं वा सदोषं वा**
**कर्तव्यरक्षता सता[7] ॥**

प्रजारक्षणे राज्यपालने च ब्राह्मणस्य सहायेन दैविकान् आतङ्कान् क्षत्रियः अपनुदेत् । एवं ब्राह्मणोऽपि क्षत्रियात् रक्षणं लब्ध्वा क्षत्रियेण व्यपोहितदुष्टशक्तिः यागादिकर्म कुर्यादिति शास्त्रपुराणेतिहासेषु स्पष्टमुक्तम्। ब्रह्मसम्मितं क्षत्रं लोकोपकाराय भवतीति मनुनापि स्पष्टमुक्तम्। अतः क्षत्रियः अभ्युदयमिच्छन् वेदान् ब्राह्मणान् पूजयन् स्वकर्तव्यपरो भवेत् । ब्राह्मणः क्वचित् अविद्वानपि न दुष्यति। श्मशाने वर्तमानोऽग्निरपि यथा दाहको भवति, पवित्रश्च भवति तथैव क्षत्रियेण ब्राह्मणाः पूज्याः। ब्राह्मणेन रक्षितः क्षत्रियः परैः अप्रधृष्यः भवति । ब्राह्मणेन विना क्षत्रियो न वर्धते । एवं क्षत्रियेण विना ब्राह्मणः स्वकर्मसु न प्रभवति। न केवलमयं राजधर्मः, किन्तु क्षत्रियाणां सर्वेषामपि सामान्यो धर्मः इति मनुः स्पष्टमुक्तवान्। गौतमोऽपि ब्राह्मणक्षत्रियावेव धर्मरक्षकौ लोकपालको इत्याह ।

**द्वौ लोके धृतव्रतौ राजा**
**ब्राह्मणश्च बहुश्रुतः[8]।**

एवं ब्रह्मक्षत्रयोः अन्योन्योपजीवत्वनिरूपकाः मनुना प्रतिपादिताः श्लोकाः पूर्वोक्तभागस्यैव द्योतकाः अत्रोदाह्रियन्ते ।

**परमप्यापदं प्राप्तो**
**ब्राह्मणान्न प्रकोपयेत् ।**
**ते ह्येनं कुपिता हन्यु-**
**स्सद्यस्सबलवाहनम् ॥**
**यैः कृतस्सर्वभक्षोऽ-**
**ग्निरपेयश्च महोदधिः ।**
**न तस्मिन् धारयेत् दण्डं**
**धार्मिकः पृथिवीपतिः ।**
**क्षत्रियस्य हि बालिश्याद्**
**ब्राह्मणस्सीतदि क्षुधा[9] ॥**

**वैश्यधर्माः -**

नवमाध्याये वैश्यस्य विशेषधर्मान् संक्षेपेण मनुरेवं सूचितवान् ।

**वैश्यस्तु कृतसंस्कारः**
**कृत्वा दारपरिग्रहम् ।**
**वार्तायां नित्ययुक्तस्स्यात्**
**पशूनां चैव रक्षणे ॥**
**प्रजापतिर्हि वैश्याय**
**सृष्ट्वा परिददे पशून् ।**
**ब्राह्मणाय च राज्ञे च**
**सर्वाः परिददे प्रजाः ॥**
**न च वैश्यस्य कामः**
**स्यात् न रक्षेयं पशूनिति ।**
**वैश्ये चेच्छति नान्येन**
**रक्षितव्याः कथञ्चन[10] ॥**

**शूद्रधर्माः -**

मनोः काले अनादृतोऽपि शूद्रः कालान्तरे समाजे आदृत इति गौतमधर्मसूत्रेण स्पष्टं ज्ञायते। तेषां क्रियाः अमन्त्रकाः इत्येतावता तस्य न्यूनत्वं मनुनापि न सूचितम्। स्त्रियामपि तथाविधस्य

अमन्त्रकाणामेव क्रियाणां विधानात् । न स्त्रियः हीनाः, ताभिः विना धर्मस्यैव अभावात् । गौतमधर्मसूत्रे द्वितीयाध्याये शूद्रधर्माः विस्तरेण विवृताः । तत्र उपनयनाभावादेव शूद्रस्य अन्येभ्य: न्यूनत्वं दृश्यते न जात्या । स्पष्टप्रतिपत्तये समिताक्षरगौतमधर्मसूत्रमुदाह्रियते ।

**'शूद्रश्चतुर्थो वर्ण एकजाति: । '**

चतुर्थो वर्ण इति। वर्णसामान्यत्वे सत्यपि चतुर्थग्रहणं पूर्वेषां त्रयाणां ब्राह्मणादिवर्णानां पृथग्वर्णत्वोपपादनार्थम्। त्रैवर्णिका इति सिद्धत्वादेकजातिरुपनयनं पूर्वेषां द्वितीयजन्म तदस्य नास्तीति। उपनयनप्रतिषेधात्तत्पूर्वकमध्ययनमपि न भवति। तद्विषये गृह्यकार आहशूद्रस्यापि
निषेकपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलान्यमन्त्र
काणि यथाकालमुदिष्टानि इति। विवाहोऽप्यमन्त्रको यथाचारं भवति।

**'तस्यापि सत्यमक्रोधः शौचम् ।'**

उपनयनाध्ययनरहितत्वेऽपि यथा वृत्तिकत्वं मा भूदिति तस्यापि शूद्रस्य सत्यादयो धर्मा भवन्ति । सत्यं यथा दृष्टार्थवादित्वम् । अक्रोधः परानभिद्रोहबुद्धिः। शौचं पूर्वोक्तद्रव्यशौचं मनः शौचमित्यादि। वसिष्ठस्तु सर्वेषां सत्यमक्रोधो दानमहिंसा प्रजननं चेति ।

**'आचमनार्थे पाणिपादप्रक्षालनमेवैके ।**

पूर्वेषां वर्णानां यत्राऽचमनमुक्तं तस्मिन् विषये शूद्रस्य पाणिपादप्रक्षालनमेव भवति नान्य आचमनकल्प इत्येके मन्यन्ते। मनुस्तु सकृदम्बुपानमिच्छति। स्त्रीशूद्रौ तु सकृत् सकृदिति। नित्यस्नानविषये तूशना - सच्छूद्रः स्नानादसच्छूद्र◌ः पाणिपाद प्रक्षालयेत् इति । प्रचीनकालेऴर्णधर्माणां महत्वं अत्यन्तं दृश्यते । ये ये वर्णाः तेषां वर्णाश्रमान् पालयितुं क्लेषो जातश्च नूतनत्व (नवीनम्) इत्यादि कारणेन च कलिप्रभावेण ते वर्णाश्रमाणां पालनं कर्तं किंचित् क्लेषं भवतीति ममा भिप्रायः। अयं शोधपत्रं प्राचीनोक्त वर्णाश्रम धर्मैः आचरणेन मनुष्याणां श्रेयस्करं भवतीति अहं विश्वसामि । येथद् शोधपत्रं सर्वेषां उपयोगं भवतीति विस्वसामि ।

**उपयुक्तग्रन्थसूची -**


[1]अमरकोशः - का.२ - वर्ग.७ - श्लो.१ - पृ.३२४

[2]अष्टाध्यायी - अ.७ - पा.३ - सू.३४ - पृ.२०६

[3]मनुधर्मशास्त्रम् - अ.१ - श्लो.९६ - पृ.२९

[4]मनुस्मृतिः - अ.२ - श्लो.१६८, १६९ - पृ.७८

[5]अष्टाध्यायी - अ.४ - पा.१ - सू.१३८ - पृ.८८

[6]रघुवंशः - स.२ - श्लो.५३ - पृ.५४

[7]श्रीमद्रामायणम् - बालकाण्डः - स.२५ - श्लो.१८ - पृ.२०३

[8]गौतमधर्मसूत्रम् - अ.८ - सू.१ - पृ.५१

[9]मनुस्मृतिः - अ.११ - श्लो.१२ - पृ.५७२

[10]मनुस्मृतिः - अ.९ - श्लो.३२६, ३२७,३२८